याश्चैवतत्रयदाहमित्यस्ययदधिकरणंचिन्मात्ररूपंतत्रैवेदंसंसमन्तासरतितदातस्यास्फुटता
सदाशिवताहमिदमिति इदमहमितित्विदमित्यंशेस्फुटीभूतेधिकरणेयदाहमंशविमर्शोनिविं
शतितदेश्वरतेतिविभागः ३ ननुकस्मादियंशुद्धाविद्येत्याह ॥ इदंभावोपपन्नानांवेद्यभूमिमपे
युषांभावानांबोधसारत्वाद्यथावस्त्ववलोकनात् ॥ अवलोकनंप्रथनंवेदनंविद्यायथावस्तुत्वंवस्तु
तत्सारित्वंचतस्याःशुद्धिरविपरीतता वेद्यदशांबोपगतवतामंगीकृतवतामतएवेदमित्येवंभूतेनो
चितेनपरामर्शेनोपपन्नानांपरामृश्यमानानांभावानांबोधएवप्रकाशात्मासारंरूपंवस्तुप्रकाशस्वा
तन्त्र्योन्मेषविमर्शात्माहमितितदेषांयदेवपारमार्थिकंरूपंतत्रैवप्रत्यवमर्शनादहमिदमित्यस्यशुद्धवेद

तद्रूपत्वम् ४ अधिष्ठातृरूपा हि ईश्वरता द्वयात्तत्त्वस्वरूपं विभक्तमिति तद्भङ्ग्या प्रतिपादयत्यागमव्यवहारे
अपरापरत्वं भावानामनात्मत्वेनाभासनात् परतां हृत्तयाच्छादितत्वेनापरदशा हि सा । परत्वं शक्तीनाम
नन्यापेक्षत्वादहमिति अपरत्वं मन्त्रेश्वराणां तदपेक्षत्वादिदमिति अत्र च तत्त्वद्वये भावानां ध्यामलरूपाणामुभयो
शस्पर्शित्वात्परापरत्वमिति वेद्यभावनिष्ठदशातत्त्वस्वरूपात्तदवभासयितृमन्त्रेश्वरादिशुद्धप्रमातृसंवेद्य
वस्तुसामान्यात्तत्त्वमिश्रसंवेदनदशाशुद्धाविद्यातत्त्वमात्रवर्गाधिष्ठातृत्वं श्रीसदाशिवेश्वरभट्टारकरू
पतेति संक्षेपः ५ एवमेकेषां मते इदमित्याच्छादको यो भावस्तस्य यथा प्रथा नाशुद्धविद्या अन्येन मन्त्र।
तेषां सांविदं भागमाच्छादनीयस्तस्य यदवभासनं तत्तथा नाशुद्धविद्या स्याद्धि सदिदमंशः केनभा
सतो मायया तत्राभावाद्भावेवाप्ररोहप्रसंगात् अत एवेयं प्ररोहात्महिम्ना स्वयं तन्त्रं दत्ताभासयति
ततः शुद्धाभासनात्स्वविद्येति तत एवाप्ररूढमायाकलुषतावमहामायेयं श्रीरौरवादिगुरुभिरुपदि
ष्टेत्यदेतदाह ॥ भेदधीरेव भावेषु कर्तुर्बोधात्मनोऽपि या । मायाशक्त्येव सा विद्येत्यन्ये विद्येश्वरा यथा ॥
मायाप्रमातृविज्ञानाकलादिरूपेऽपि बुद्धिरहितत्वाच्चिन्मात्ररूप एव प्रमातरि कर्तरि चमत्कृतिविदेकरूपेऽपि भावेषु यद्
विद्रूपतया तत्प्रकाशनलक्षणो ह्यातंकोऽसौ शुद्धविद्या मायाशक्त्या तत्स्यावेद्यभागे भेदप्रकाशनात् न च मा
येव ग्राहकस्य चिन्मात्रभागे तावदपर्यालोचनात् येन प्रकारेण विद्येश्वरा भगवतोऽनन्तादयो वर्तन्ते तेन हि शु
द्धचिन्मात्ररूढीनाहं भावाः स्वतन्त्रा भिन्ना एवेषां पश्यन्ति यथाद्वैतवादिनो मीश्वरः एवं ग्राहकमतत्वे चेतत्व

रूपात्परमार्थरूपेग्राह्यविपर्यासेनशक्तिः शुद्धविद्याविद्येश्वराणाम् ८ योयंग्राह्यभगवतः परमशिव
स्याग्रहच्छभेदावभासनं सदाशिवेश्वरता तत्रास्फुटतेच्छाशक्तिरीश्वरस्यव्याप्रियते स्फुटत्वेज्ञान
शक्तिः प्रच्छन्नभेदेग्राह्यविपर्यासेपिग्राहकचिन्मात्रतायांविद्येश्वरेषुक्रियाशक्तिः ग्राहकग्राह्य
विपर्यासद्वयप्रच्छन्नमायाशक्तिः साचपशुप्रमातृषुग्राहकग्राह्योभयविपर्याससंस्कारेणनिद्रा
नेपियदेतद्वस्तुपरमार्थप्रथनं तत्रविद्याशक्तिव्यापारोयोगिज्ञानिप्रभृतिषुपशुप्रमातृषु तदेत
द्दर्शयति ॥ तस्यैश्वर्यप्रभावस्यपशुभावेप्रकाशिका विद्याशक्तिः पशुभावविपर्यासैकरसत्वा
त्तत्तत्पाशनीयत्वेसतिस्वतंत्रत्वेस्वपरस्पर्शनभेदेसत्यपिज्ञातेसर्वैकशक्तिबलेनयदेतद्वैश्वर्यम्
कंतस्ययाप्रकाशिकापरमेश्वरशक्तिर्यद्वशात्केचिदेवतानुकारोहस्यतदाशुलब्धोदयाःकृतिनोभ
वंतिसाविद्याशक्तिः अयमेवचश्रीषडर्धसारादिदृष्टोस्माचार्यस्यहृदयमावर्तयतिपदः श्रम्परस
गुरौ ॥ एतदपांतर्योविशेषेनचमायातत्वनिरूपणमुदाह ॥ तिरोधानकरीमायाभिधापुनः ॥
मायाशक्तिःपुनरचिद्रूपेशून्यादौप्रमातृताभिमानंप्ररूढंदधतीभावानपिचिन्मयान्भेदेनाभिमानयं
तीसर्वथैवस्वरूपंतिरोधत्तेग्राहयतेविमोहिनीहिसातिरोधानमत्रनविलयरूपंमंतव्यं यत्कृतपंच
कमध्येप्यागमेषुगण्यतेदीक्षितस्यापिहृत्मंत्रादिनिर्दग्धप्रायमपिचावरणमेव ७ तिरोधानमावर
णरूपंस्फुटयति ॥ भेदेनैकरसेभातेहंतयानात्मनीतिते शून्येबुद्धौशरीरेवामायाशक्तिर्विजृंभते

ई॰ प्र॰ ८॰

40

सुषुप्ते प्रलये नेमभावसमाधौ च तावच्छून्यसमाकाशकल्पमनात्मरूपं वेद्याभावो वितनमहमित्यात्मत्वेन
वीक्षते उन्मूलनेनिःस्मनादौ वाहमसुखिमीति प्राणो वायुकल्पः स्थावरजंगमजिघत्सामस्वप्रस्ख-
लनादौ वा प्राण एव तेजः समपहंहितः स्वच्छोदकामयकल्पा वेद्यप्रतिविंबनवती बुद्धिरिति नि-
विशते ग्रंतरहं वेद्यिदुःख्येहमिति विंतायवस्थासु शरीरमेव पृथिवीप्रायं कृशोहमित्यादि दश-
हमित्यात्मतया भाति सर्वं चैवेदं शून्यादि वस्तुतश्चिन्मात्रसारमेव मायीयैवतादवचिद्रूपतया
भासितं तथाविधमेव तत्सदहमिति संविद्रूपताभिनिवेशस्यानेकंपादितमप्रशांतजडभावमेवेति
दुष्करतमवस्तुसंपादनाप्रतीघातरूपापरमेश्वरस्य मायाशक्तिरित्येतद्विजृंभते इत्यनेन दर्शितं
वाग्रहणेन वेद्यरूपाणां स्वतथनरागादीनामहंताभिनिवेशाविनियतमसंख्यातं सूचयति ८
ननु चिद्रूपत्वादस्यात्मा यदि शून्यादिस्तदात्मतयासाव भिनिविष्यमानश्चिद्रूप एवेति सर्वं तत्र सर्व-
कर्तृत्वादिविशुद्धैश्वर्यधर्मवत्स्यादित्याशंक्याह ॥ यस्य प्रमाता शून्यादिः प्रमेये व्यतिरेकिणि । माता स
मेयः सन्कालादिकपंचकवेष्टितः ॥ स्यादैश्वर्यधर्मयोगः शून्यादेर्यद्यहमित्यभिनिविशमानोपि मा-
यतोजस्यात् तथाहि सति प्रमेयमप्यस्य नीलादिव्यतिरिक्ततया न भासेत यावता यः शून्यादिः प्रमा-
ता कथितः स यावदेव स्वरूपाव्यतिरेकाभिमते नीलादौ प्रमेये माता तावदेव स्वयमपि मेयभूत एव
सन्माता मेये हि मीयमानत्वादेव परिमितमिति तादृशादेव मेयान्तरादपयत्रव्यतिरेकं न त्वेवं विद्-

८॰

पमपरिमितत्वात् परिमितत्वं च शून्यादेरहंभावस्य यत् देवकालादिपंचकं तथा हि कालः क्रममासू
त्रयत्प्रमातरि विजृंभमाणस्तदनुसारेण प्रमेयेपि प्रसरति योहं कृशोभवं स स्थूलो वर्त्ते भविष्यामि स्थू
लतरश्चेत्येवमात्मानं देहरूपं क्रमवंतमिव परामृशंस्तत्स्तथाविधिना प्रमेयेपि भूतादिरूपं क्रमं प्रकाश
यति अस्य च शून्यादेर्जडस्य विद्या किंचिज्ज्ञत्वोन्मीलनरूपा बुद्धिदर्पणसंक्रांतभावराशिं नीलसुखादिं
विविनक्ति कला किंचित्कर्तृत्वोपोद्बलनमयी कार्यमुद्भावयति किंचिज्जानामि किंचित्करोमि अत्र चांश
त्वस्ये किंचिवेकस्यादिदमेव किंचिदित्यत्रार्थेभिष्वङ्गरूपः प्रमातरि देहादौ प्रमेये च गुणारोपणामयश्
च रागो व्याप्रियते न च तद्बुद्धिगतमवैराग्यमेव तदित्युक्तं हृद्रत्यादिप्रमदायां न भवेदपि रागस्तु भा
वस्येव बुद्धिधर्माष्टकेपि च दृष्टोभिष्वङ्गः अत्रैव कस्मादभिष्वङ्गरूपमयमर्थो नियत्या नियम्यते एवं का
लविद्याकलारागनियतिभिरावृतो मायया पदार्थसर्वस्वः सन्नरोपि प्रतिवितीर्णतत्सर्वस्वरा
शिमध्यगतभागमात्रपर्यवसितो यमितः प्रमाता भाति इदानीमिदं किंचिज्जानानः इदं कुर्वाणोत्र रक्तोत्र
वचयः सोहमितिपूर्वांच भिन्नविषयत्वमपि भवति कदाचित् यथा मंत्ररक्तोपि नियमायकार्यंतेर
तिपतेच प्रमातृलयतत्येवमांतीति तस्येव शक्तिरूपाः प्रतिप्रमातृभिन्ना एवं कदाचिन्न नष्टमलस्येतादृ
वीश्वरेच्छातिरिक्तं निजं किमपि जीवितमस्तीति सकृदुक्तं वदन्ते ९ यदुक्तमिदमितत्र प्रमेये ख्याति
रेकिणीमातेति तत्र तत्प्रमेयं दर्शयति ॥ त्रयोविंशतिधा मेयं यत्कारणमात्मकं तस्य विभागरूपेकं प्रा

ई॰ प्र॰ ८१

81

धानं मूलकारकम् ॥ यत्कार्यकारणरूपं त्रयोविंशतिप्रकारं यत्तत्समस्तमूलम् तं कारणं सर्वकार्यकारणवि
भागरूपं प्रधाननाम तत्सर्वमेयमिति संबंधः योगिभिस्तत्तदीघ्राप्रभृतीनां हि भूततन्मात्रकारणप्रधानवशी
कारो योगिनां सर्वमेव प्रमेयं संसारिणामप्यनुमानागमादिदिशा प्रमेयमेवेती यत्प्रमेयं कालादयस्त
प्रमेया अपि प्रमातर्येव लग्ना इति प्रमातृशक्तिसंभावनात् न प्रमेयत्वेनेहावसरे प्रमातृव्यतिरिक्तप्रमे
यप्रस्तावात्स निगणिताः वक्ष्यतो ह्यत्र योऽयं प्रमाता तापि प्रमेयप्रवृत्तस्तप्रमात्रो क्रियमाणश्चाच्छादित
प्रमेयताकरहोच्यते ९ ननु त्रयोविंशतौ किं कार्यं कारणमित्याशंक्याह ॥ त्रयोदशविधा चात्र बा
ह्यांतःकरणी बली कार्यवर्गश्च दशधा स्थूलसूक्ष्मत्वभेदतः ॥ प्रमातुः सर्वकारणोपयोगश्चास्मादेव त्र
योदशकरणानि तत्र बुद्धिरध्यवसायमात्रमात्मसमावृत्तरूपा ग्राह्यग्राहकाभिमानरूपोऽहंकारः संकल्पादि
करणं मनः इत्यंतःकरणं त्रिधा बुद्धेरेवाहाय्यध्यवसायरूपायामुपयोगीनि बुद्धीन्द्रियाणि पंच श्रोत्रंत्व
क्चक्षुर्जिह्वाघ्राणमिति कर्मणि उपयोगीनि पंचकर्मेन्द्रियाणि तथा हि त्यागो ग्रहणं द्वयमिति वहिर्वि
षयं वाक् पाणिः पादः इति करणानि एतदेवांतःशरीरे न क्रियते तद्वागिन्द्रियं तस्य तावत्प्रशंसा विश्रां
तिक्रियोपयोगश्चोपस्थः सर्वदेहव्यापकानि च कर्मेन्द्रियाणि अहंकारविशेषात्मकानि तेन छिन्नहस्तो बा
हुभ्यामाददानः पाणिनैवाददानेप्येवमसमत् केवलं तत्स्फुरदशक्तिर्निलामस्थानता संवायतितरूपमधिष्ठानमस्य
अनेनैवैकं करणानि त्रयोदश एवं च कार्यमपि असाधारणेनकारणेन व्यपदेशः स्थूलं कार्यं पृथिव्यापस्तेजो नभ इति एव

सूक्ष्ममेषामेवरूपंगंधोरसोरूपंस्पर्शःशब्दइति तत्रैकैकगुणमाकाशादिएकैकवृद्धगुणंवेतिदर्श
नभेदइहनविवेचितोऽनुपयोगात् तत्रस्थूलेविभक्तमहदिभागस्यानुमाकमितिस्थूलोपक्रममनकं
तत्रपृथिव्याद्याभासापवमिश्रीभूयघटादिस्थललक्षणीभूताः कर्मेंद्रियैरुपसर्पिताबुद्धींद्रियैरालोचि
तास्ततःकरणेनसंकल्पिताभिमतेनिश्चितरूपाविद्ययाविवेचिताःकालादिभिरनुरंजिताःप्रमाता
रिविश्राम्यंतीतितात्पर्यं एतच्चविस्तरतस्तत्त्वस्थानेषुतंत्रालोकसारादिषुमयानिर्णीतमितीहानुपयो
गान्नविततानिनमितिशिवं ॥ आदितः १५२ इतिश्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभि
ज्ञाविमर्शिन्यामागमाधिकारेतत्त्वनिरूपणंनामप्रथममाह्निकं ॥ एवंविदितस्वभावोपिविचित्रा
मातृकल्पनो यदन्यमंडलचक्रेयःप्रथयेत्तंस्तुमःशिवं एवंतत्त्वराशौनिर्णीतेएतदंतर्भाविनोक्रमपि
प्रमातृतयानिर्णीतव्यंप्रमातृजातंवितत्यनिर्णीतंनत्वेतन्मात्रं नामात्रेमाद्यानोविश्रामकःपरइसंते
विंशतिश्लोकैराह्निकांतरंप्रस्तूयतेतथाहिप्रमातृरवस्वरूपप्रत्यभिज्ञानंसम्यगुपदिश्यतेमहिहेय।
मुपादेयंचस्वस्वभावेविश्राम्यपरमोपादेयरूपंशिवस्वभावंस्वात्मानमभेदेनाविशंजीवन्नेवमुक्तोभव
ति तत्रश्लोकेनब्रह्मादित्रयस्वरूपं ततोपिद्वयेनहेयोपादेयप्रमातृत्वं ततस्तदुपयोगिमल
स्वरूपंतत्कृतंचप्रमातृभेदंश्लोकसप्तदशकेन द्वयेनसमावेशस्वरूपंश्लोकपंचकेनप्रमातुरेव
स्वषष्ठ्याद्यवस्थाः त्रयेणतासांहेयोपादेयविभागंनिरूपयतीत्याह्निकस्यतात्पर्यम् ॥ यं

ई॰
प्र॰
८२
82

घार्थस्तन्निरूप्यते ॥ तत्रैतन्मात्रतामात्रस्थितौ सदाशिवादिदेवतं भिन्नप्रमेयप्रसरोज्झितत्वा विमृश्य व्यवस्थितौ
तत्रेति एवंभूते स्मिन्नागमसिद्धे शुद्धानुगते च तत्त्वस्वरूपे सति यदेतत्कालादिपंचकवेष्टितप्रमातृतारू
पं तदेव यस्माच्छुद्धमपसंदन्न प्रमेयजातं भवति दृशायां संहाराख्यायां तस्मात्मयि शासने तात्वं तद्
शासंपादनेन सोपानकलोकस्य तद्दशादानेन तद्दशाध्यानावेशसमापत्त्या स्वाभिन्न
त्वसंपादनेन च भजमानो भट्टारकेश्वर एव कृतो भगवान्मायापदेशिप्राणापानात्मकधर्माधर्मस्व
र्येन्दुदिननिशादिविश्वक्रमध्यमज्योतीरूपप्रमातृस्वरूपस्पर्शान्मीलिततत्तीयनेत्रोभिन्नस्य तत्प्रमेय
स्य प्रसरसंपादनेऽधिष्ठातृदेवतात्वं भजन्नुक्ता प्रसृते भिन्नप्रमेये तत्संतानप्रवर्त्तनोल्लसत्प्रसरोऽधिष्ठा
तृदेवताविस्फः अत एव तयोः प्रमेयप्रसरसंवेदनं नीलमिदं वेद्यप्रकाशात्मनः प्रायोग्यादहमिति प्रमातृदशा
वेशश्चान्यथा तत्तत्तीयनेत्रोन्मीलनं देवते एवं तत्प्रसरशुद्धान्तिः संतानस्य । यदेतन्मात्रतामात्रमन्तं
स्वविभागगाभिकं च संतामेदं निरूपयति ॥ एष प्रमाता मायान्धः संसारी कर्मबन्धनः । विद्याभिज्ञापिता
त्यैश्वर्यश्चिद्घनो मुक्त उच्यते ॥ स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः । मायातो भेदभागेषु क्लेशकर्मादिक
लुषः पशुः ॥ मायया यो यो विमोहितः अत एव कर्माणि स्वात्मनो बन्धकान्यभिमन्यमानः पश्यति कालादिवे
ष्टितः स्मयादिः प्रमाता संसरतीत्यतः संसारी देहोऽपि स्वरूपसाक्षात्कारं बालस्यैव नादिष्वन्नवर्तयन्संसर
तीत्यतः संसारी देहोऽपि स्वरूपसाक्षात्कारं बालस्यैव नादिषु नवर्त्तयन्संसरतीव बुद्ध्यादेस्तज्जन्मान्तरेऽपि संस

ग्रणं विद्ययात्तत्स्वरूपप्रकाशनरूपयाशक्त्याप्रतिमिलितापदंप्रापितमैश्वर्यंतस्मात्तएवशरीराद्यपिवि
श्वमपिसंवेदनमेवाभिमन्यमानोतएवचिदेकघनामाचिद्रूपव्यामिश्रणोज्झन्यात्मस्वरूपंसप्तुनर्जन्मबंध
विरहाद्देहेपिस्थितेमुक्तइतिव्यपदेशयोग्यःपतितेतुशिवएवैकघनइतिकःकृतोमुक्तः अतएवगमा
तप्रमातॄनंतरोपितत्त्वपाशमुक्तःशिवइतिव्यवहारः यश्चासौमुक्तःसभावान्स्वांगवदभिमन्यमानःप्रमिमी
तइतिसतेषांस्वामीस्वरूपपरमार्थसमर्पणात्स्वपालकइतिपतिरुपदिष्टः आत्मैवमायाशक्तिकृताभेद
न्यूनातिरिक्तानेवसतोयदाभिमीनितदातैरेवमेयैःपाशितरूपैःपाशितइतिपशुरुक्तः तथाहिवेद्यराशिव
शादेवाःस्मास्मितारागद्वेषाभिनिवेशाख्यःक्लेशाधर्माधर्मादिरूपाणिकर्माण्याद्विपदादाशयरूपावासःफल
भोगरूपोविपाकइतिकार्त्स्न्यमनंतप्रकारंयतःपाशितत्वात्पशुरित्युक्तः २ यदेवेत्थंस्वरूपंतदेवा
गमेषुत्रिविधंमलमित्याह॥ स्वातंत्र्यहानिर्बोधस्यस्वातंत्र्यस्याप्यबोधता द्विधाणवंमलमिदंस्वस्व
पापहानितः॥ भिन्नवेद्यप्रथात्रैवमायाख्यंजन्मभोगदं कर्तर्यबोधेकार्मंतुमायाशक्त्यैवतत्त्रयं॥
इहतावत्कर्तृत्वरूपंतावच्चितनस्यस्वरूपंतस्यापहारोनामाणवंमलंयेनासावणुःसंकुचितोजातःतत्रस्व
रूपस्यनिमीलनंसंकोचःतस्मिंतेबोधरूपेकर्तृत्वलक्षणस्यस्वातंत्र्यात्मनःस्वरूपंतस्यनिमीलनंविप
र्ययोवेत्सभयथाणवंमलंस्वरूपापहानिरूपमेकमेव द्वैविध्येतिसत्त्वाणवंमलंद्विप्रकारंस्वरूप
संकोचेतत्रभिन्नस्यपत्यथनंतस्समायीयमितिसंतामात्रंमायाकृतनेनहिमायीयतामलत्वयस्मा

पितत्रकर्तृत्वेरबोधरूपस्यदेहादेर्भिन्नवेद्यप्रथनेस्वातंत्र्यधर्माधर्मरूपंकर्ममलंयतोजन्मभोगश्चास्यचनिया-
तावधिकइतिजात्यायुर्भोगफलंकर्मैस्वकंभवति ५ अथैषांमलानांविभक्तविषयनिरूपणात्
स्वरूपंस्फुटीकर्तुंस्वात्मसहातिनिर्बोधस्येत्स्यस्यभागस्यतावद्विषयमाह ॥ शुद्धबोधात्मकत्वेपियेषांनो
त्तमकर्तृता निर्मितास्तेस्वात्मनोभिन्नाभर्त्राते कर्तृतात्ययात् ॥ येषांचिन्मात्रमेवपरमार्थोनतुदेहमिति
स्वात्मविश्रान्त्यानंदरूपंपरमंस्वातंत्र्यंतेपरमेश्वरेणतथानिर्मिताःस्वात्मनःसकाशाद्व्यतिरिक्ताः अत्रहेतुः
कर्तृतायाउत्तमस्वातंत्र्यलक्षणायाअत्ययादभावात् परमेश्वरस्यतत्तमस्वातंत्र्याविशुद्धबोधरूपत्वमि
त्यभिप्रायशेषः ६ ननुस्वाद्वैतोर्भवतुपरमेश्वरात्तेषांभिन्नत्वमन्योन्यतस्तुकथंभेदःबोधरूपस्यव्या-
पकत्वनित्यत्वकृतस्यचदेशकालाभेदस्यसमानत्वात् अन्योन्यभेदाभावेपिचनिर्मितास्तेइतिकथंब
हुवचनेनस्याशंकांव्यपोहति ॥ बोधादिलक्षणैक्येपितेषामन्योन्यभिन्नता तथेश्वरेच्छाभेदेनतेच
विज्ञानकेवलाः ॥ इहहिसर्वथाप्रतिहतशक्तिःपरमेश्वरएवइतितथाद्भुतत्वात्तथाभातिनत्व
न्यः कश्चित्परमार्थतोस्तीत्युक्तं ततश्चव्यापकनित्यबोधस्वभावोप्यहंभेदेननिर्भासेतेवं-
भूतेनेश्वरेच्छाविशेषेणतेषांशरीराद्यशून्यानांप्रमातृपदोन्मीलितानांबोधत्वनित्यत्वविभुत्वादिधर्म
ज्ञातस्यैक्येप्यन्योन्यंभेदः तेचशास्त्रेविज्ञानकेवलाउक्ताः तत्रविज्ञानकेवलामलैकयुक्तइत्यादौवि
ज्ञानंबोधात्मकंरूपंकेवलंस्वातंत्र्यविरहितमेषामिति ७ एवंस्वात्मसहातिनिर्बोधस्येत्स्यस्यभागस्यवि-

तानाकलविषयतामन्कारातंअस्याप्यबोधतेमलसंशंविषयप्रदर्शनेनस्पष्टयति ॥ अस्यापबोध
रूपात्मकर्तारः प्रलयाकलाः तेषांकार्मोमलोप्यस्तिमायीयस्त्वविकल्पितः ॥ अमेजडत्वादबोधरूप
एवयदिवाप्राणेबुद्धौवायेषामहमितिचमत्कारयोगात्कर्तृत्वंतेप्रलयेनकृताः अकलाः कलातत्वो
पलक्षितकारणकार्यरहिताअबोधरूपाकर्तारश्चप्रलयावधिहितेनयाभूताउत्तरकालेनकार्यका
रणसंबद्धाएवभवंति यतस्तेषांनकेवलमव्यक्तरूपप्राणएवमलोयावत्कार्मोपिवासनासंस्काररूपो
धर्माधर्मात्मास्तिवचयद्येवंभिन्नरूपप्रधानोपेक्षास्मात् सतां संवेद्यरूपेणसुषुप्तपदेअपवेदितनभवति
तेनमायीयोमलएषांविकल्पितोव्यवस्थितविषयत्वेन तथाहिकेपिप्रलयादिभागविश्रांतागाढ
निद्राजडीकृताअपवेद्यसुषुप्तपदभाजः अन्येतबुद्ध्यादिनिष्ठाः स्वप्नवेद्भवशेषसामान्यात्मकभिन्न
वेद्यसंवेदनयोगिनः सवेद्यसौषुप्तपदलीनास्थूलदेहेन्द्रियात्मककार्यकारणवियोगरूपत्वंतुप्रलयाक
लत्वावाणांसर्वेषांतुल्यम् ८ एवंप्रलयाकलेमायाप्यबोधतेमेवमंशाः स्फुटीकृतः प्रसंगाच्चकार्ममलस्यवि
षयोदर्शितः मायामलस्यरूपादिकंतुवस्तु अथज्ञानाकलानाणवकार्ममलद्वयभावेपिस्वप्नोत्थमाया
व्यस्यविषयरं निदर्शयति ॥ बोधनामपिकर्तृत्वज्ञत्वांकार्ममलत्वात्तो भिन्नवेद्यप्रमांमायांमलोविद्ये
श्वराख्यते ॥ येचिन्मात्रमेवात्मतयापश्यंत्यहमितिचमत्कारोत्लासाकर्तारस्तएवसर्वज्ञाःसर्वकर्ता
रश्चतेविद्येश्वराः किंतुनतत्कारणमनादियदेषांवेद्यतयाकार्यंतयाचभातितत्क्विंदपदर्शयामि

त्रमेव सदिग्धस्त्रिविधेश्वराणां मायाख्यमलयोगः ९ अथामलत्रयस्यापि वियोगपक्षे न यो विषयस्तं दर्श-
यितुमाह ॥ देवादीनां च सर्वेषां भविनां त्रिविधं मलं तत्रापि कार्ममेवैकं मुख्यं संसारकारणं ॥ इह वि-
धेश्वरा विज्ञानाकलास्तावत्तु भविनः मायोत्ताधात्तिक्रमणात् प्रलयाकला अपि किंचित्कालमविद्यमा-
नभवाः ये त्वेते मायान्तरालपरिवर्तिनो देवादयः स्थावरान्ताश्चतुर्दशधा शास्त्रेषु परिगणिता-
स्ते सर्वे भविनः संसारिणः तेषां च त्रयोपि युगपन्मलाः न तु मलत्रयमप्येकतमो मलः संसरणमेषां
संपादयेत् आह तत्रापि तेषु त्रिष्वपि सत्स्वकार्म्मं मलं मुख्यं तया सन्निपत्य संसरणे कारणं यथोक्तं
कर्म तत्र शरीराणि विषयाः करणानि चेति तत्र कारणं विषयसंबंधएव वर्तमानो भविष्यंश्चानवर-
तं प्रबंधतो वर्तमानः संसरणमुच्यते आणवमायामलौ तु सत्यपि न कारणं संसारे तथापि कार्म-
णाविनातौ देहादिविचित्रभावाभिनिर्वर्तनशक्तिशून्यौ विज्ञानाकलादिष्विति मुख्यं कार्ममेव मलं सं-
सारकारणं तत्र तत्र शास्त्रेषु गण्यते अतएव तदुपरोधेन भेदनं तावत्संसरणसोपानपदंबंधस्याश-
येन कर्मबंधाभिमानपरिहारान्निरवयत्नतः सांख्यपुराणभारतादिशास्त्रेषूपदिश्यते एवं मलत्रयस्यै-
कैकभेदैस्त्रिभिर्द्विभेदैस्त्रिभिस्त्रिभेदैनैकेनेति सप्तप्रमातार उत्तिष्ठंति तथा च शास्त्रे शिवादिसकलांता
स्वशक्तिमंतः सप्तैस्युक्तं तत्राप्यवांतरभेदेन गुणमुख्यताभेदेन विकल्पसमुच्चयतादिभेदेन चानं-
तप्रकारत्वमिति ९ अस्य च मलत्रयस्योद्भवतिरोभावभेदात्संसारिणां प्रकारद्व ॥

यमिति ॥ कलोद्बलितमेतच्च चित्तत्वं कर्तृतामयं अचिद्रूपस्य शून्यादेर्मितं गुणतया स्थितं ॥ यच्चे
तत्कर्तृतायास्तु बोधस्य च विदात्मनः शून्यादौ तद्गुणे ज्ञानं तत्समावेशलक्षणं ॥ एतच्चेति यच्चिद्दशादी
नां भविनां चैतन्यं कर्तृताशक्तिरूपा धामास्वलेन संविद्रागस्य निमजितता कर्तृतामयं चिद्रूपस्य तत्त्वा
स्रातं अंकलात्वेन परमेश्वरशक्त्यात्मना तत्त्वेनोपोद्बलितमतद्रूपाणां मलेन संकृतं संकोचितं शू
न्यादेर्देहपर्यन्तस्य मायाप्रमातुः संबंधितद्गुणत्वेनाप्रधानत्वेन स्थितं यतो मितमिदं तावत् देहादि
शून्यान्तप्रमेयभागनिमग्नत्वात्प्रमेयं योगारोग्यः स्थूलोयः कृषितोयः सर्वार्थपरिहितः सोहमिति ही
देहैवान्तर्हीनाहंभावा संसारिणां परिस्फुरति येयं जाग्रत्स्वप्नसुषुप्तरूपा संसारावस्था यदा तु सद्गुरू
पदेशादिदिशाभिमतेनेवाहंभावेन स्रातंमात्मना व्यापकत्वनित्यत्वादिधर्मपरामर्शमात्मनि विद
धातात्तः शून्यादेः प्रमेयाइन्यमेवास्ते तदा तुर्यातीतावस्था यदापि परामृष्टतद्धाम तत्रैव भवति
मेश्वर्यादिधर्मसंभेदेनैवाहंभावेन शून्यादिदेहधातं तत्सिद्धरसयोगेन विध्यते तदा स्यातुर्यदशायां
तदपि प्रमेयतामजहतीव सेयं तत्त्यपि जीवन्मुक्तावस्था समावेशशब्देन काशास्त्रे सम्यगावेशनमेव
हितं तत्प्रधानं तत्सिद्धये च उपदेशान्तराणि ॥ यथा गीतं मय्यावेश्य मनो ये मां इति अथावेशायितं
चित्तेन शाक्तेन शाम्भवीत्यादि च समावेशपल्लवापवचप्रसिद्धदेहादिप्रमातृभागन्यक्कीभावभावनारूपाणि
तः परमेश्वरस्वतिप्राणाम्स्वरूपानां समाधिप्रभृतयः कर्मप्रपंचाः यन्नीतमपि अभ्यासे प्यमर्थः सम्य

कर्मपरमो भवेति देहपाते तु परमेश्वरएवैकात्म्यम इति कः क्वात्र कथं समाविशेत् तदेतदाह यस्तु नः कर्तृ-
तायामव्येतंतत्रांतरीयकस्य शून्यादेर्गुणाभावः तस्मिंश्चाविद्रूपगुणीभूते स्वातंत्र्यस्याप्यवबोधतेति
मलव्यापारस्यापहस्तितात्द्वितीयोपरोप्यात्मभागो द्रोथलदत्तणो मूलेन स्पृष्टो भूतस्याप्यधुनोस्म
ऋतेन मात्वेवं यच्च तत्कर्तृतायामव्येतमन्मयत्ता इदमेव तत्तानमत्तानात्मकमलप्रतिपत्तवात्त-
देतन्मव्येनं समावेशस्य लक्षणं येन देहस्थितोपि पतिरितिमस्क इति शास्त्रे प्रुक्तः ५२ नन्वेवं पत्युस्स-
मावेशात्मिकातुर्यंतदतीतरूपाभवतु दशापशोस्तु कथं सुप्तसप्तनाग्रदशाभेदप्रागमेश्क इत्या-
शंक्य सप्तसत्रूपमेवत्तावदाचष्टे श्लोकत्रयेण ॥ शून्येबुद्ध्यायभावाम्मप्यहंताकर्तृतापदे अस्फु-
टरूपसंस्कारमात्रिणि ज्ञेयशून्यता ॥ सात्ताणामांतरीवृत्तिःप्राणादिप्रेरकामता जीवनाख्याथ
वा प्राणोहंताभ्यर्थष्टकात्मिका तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमं संवेद्यमपवेद्यं च मायामलयु-
तायुतं इह चितत्वंस्वस्वरूपमाच्छादयन्तियत्रूपेण तु आदिना देहांतेन घटादिना वा भासते एकमेव चेद-
स्यातेव्यविजृंभितं न तत्र वास्तवः क्रमो वा भेदो वा तत्रापि तत्स्वातंत्र्यात्क्रमश्च भेदश्चाभासते तदेवं स्थि-
तेयच्चितत्वस्यस्वरूपाच्छादनभागः स्वपदोपरभागांतरासंकीर्णो यदा विश्राम्यति तदन्दयाहातत्वधं
साह प्रलये इव तदनादरहानिद्रासमापिमूर्छादाविवत्तथैव चाहंताशूपं कर्तृतायाः पदं परामर्शो स्फुट-
नादरूपात्मना संस्कारेणापृष्टेन वेद्यपदवीमप्राप्तेन युक्तो भवति तदा सैवावस्थानेनैव परामर्श मेधानवे

हितानिषिथबुद्ध्यादिविषयस्मस्पष्टपरामर्शमभेदात्प्रथमं भाविनिषिध्यायोगात् किंचनोऽहमिमेवंप्रत
परामर्शवशीकृतसामामाकारनिषेधात एव संस्कारमेषीकृततत्तेयरूपात्मस्मरत्वच्यते तथाविधे बु
द्ध्यादीनां देहादिनीलांतानामभावरूपे शून्यत्वमुच्यते यतस्तत्रवेद्यानां शून्यताभावरूपता संस्कारशेषतार
यमेव हि सर्वत्राभावो न तमसतां सर्वात्मना विनाशः तत्रैव च शून्ये प्रमातरि समवेता प्राणापानसमानोदा
नव्यानात्मकेवायुचक्रप्रेरणात्मिका शक्तिः सा च विद्याकलयोः प्रपंचस्ततो योऽक्रमेण बुद्धीन्द्रियकर्मेन्द्रि
यवर्गांतयोरंतरीक्षति बाह्याहितयोः शब्दाद्यालोचनशब्दाभिव्यक्तिस्थानाभिहननात्मिकावृत्तिः तदु
क्तं सामान्यकरणवृत्तिः प्राणाद्या वायवः पंचेति एवं शून्ये एवाहंतात्तचक्रोपोद्दलिताजीवनमिति स एष
एव जीवः संसरति यदिंद्रियशक्तीनामवयांतरी साधारणप्राणात्मिका प्राणशब्दवाच्या प्राणादिमारु
तविशेषप्रेरणामयी सेवाहमित्यधिशय्यमाना जीवनं तदा प्राण एव जीवः संसारी स एव शून्यः प्राणश्च
पुर्यष्टकशब्दवाच्यः प्राणादिपंचकं बुद्धीन्द्रियगणो निश्चयात्मिका च यतो धीरुच्यते तन्मात्रपंचकं मनो
हंबुद्धयश्चेत्य तन्मात्रपंचकं मनोहंबुद्धयश्चेत्येतन्मात्रोदयरूपेण मनोहंबुद्धीतिश्रीमितापद्धतिवदंतः
एवं षडभयात्मकं पुर्यष्टकं भवत्येव शुद्धेया विश्रांतिस्तस्यां समोदहंतायाः स्वभावो याबोधलक्षणभाव
रूपं कर्म च क्रियास्वभावं तत्सोऽभूतं मलेन हि प्रमातारस्तः सकलयाद्दस्तस्वरवाचनत्रिमज्जनेन संसृष्टस्वभा
त्वस्यभावः कर्म वेति तत्र शून्यसोऽभूमेन किंहृति विकिं वेद्यमिति मायीयमलाभावादेव वेद्यं तत् प्राणस

ई॰
प्र॰
८९

स्पृष्टेन स्पर्शकृतस्तस्य सुखदुःखादेर्भावस्यायावेशमत्तिमलंइति संवेद्यं तत्र एवं गाढगाढस्वभमदितया
वत्ससत्ययोपि मेतत्वः सपरं देहादिप्रध्वंसान्नुदयकृतः चिरतरकालस्य स्वभमंत्र देहाद्यनादरकृतस्य चि
रकाले चेति विशेषः तथापि श्रमकृतं तत्र निद्रावस्थानदोषकृतं मूर्छा द्रव्यकृतं मदोन्मादादि स्वातंत्र्यकृ
तं समाधिरित्याद्यवांतरभेदाः केचिन्न समाधिरूपं संवेद्यमन्यदपवेद्यमिति प्रपन्नाः ।१९। नन्वेवं स्फुट
वेद्यपदविनिर्मुक्तस्वभावस्थासमजाग्रद्दशयोरस्फुटवेद्याभासयोगिन्योः को भेद इत्याशंक्य स्वोक
हृद्यं भेदमाह ॥ मनोमात्रपथेप्यस्य विषयत्वेन विभ्रमात् स्फुटावभासाभावानां सृष्टिः स्वप्नपदं मतं
सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा सृष्टिः साधारणी सर्वप्रमातॄणां स जागरः ॥ बाह्येन्द्रियाधिष्ठा
नानि तावत्पक्ष्मगोलकादीनि निमीलितानि निद्रायमाणस्य लक्ष्यंते न च तेषु निमीलितेषु बाह्येन्द्रियग्रहण
व्यापारो दृष्टः तेन मुख्य एव मनोमार्गे रूपस्पर्शादयो भावा अवग्रहणे संभवितेन स्फुटेन वपुषाभासन
योग्याः परमेश्वरेण सृज्यंते न तु घ्राणेनानिष्टस्य वदर्शनादिष्टस्यापि देशकालांतरादियोगेन अत एव।
मनोमात्रस्थितत्वादेव न प्रमात्रंतरसाधारणीयं सृष्टिः यत्तु तत्र बाह्येन्द्रियविषयत्वं प्रमात्रंतरसाधार
णीत्वं कालांतरस्थायिता वस्तानितावत्सर्वं तथा पुनः स्वकालं प्रबुद्धस्य न तथेति परामर्शनात्तद्रूपेण निर्मूल
त्वेनावभातीति शांतं यानि हि प्रमात्रंतराणि स्वप्ने सेंद्रियाणि च भांति तानि प्रबोधकाले भाविभिरेव तैर
भिन्नानीति निश्चयः प्रबोधकाले च न तथेति निश्चयान्नहि निरपदत्वे तत्नो भयमपि शांतं न सूच्यते शांतत्वमेव चा

८९

स्थैर्यं एवमिंद्रियाविषयत्वेनैवासाधारणत्वमात्रिमं विश्रमेणोवचास्थैर्यमितिस्वकंठेनतज्जाग्रत्सतिथा
शिथर्मनिरूपणावसरेऽपिनदर्शितं एवंभूतायाःसृष्टिःशापशोःसमसमयेभावात्स्वप्नपदेसमकालेविष
यःइतितथाभूतविषयेप्रमातृत्वंपशोःस्वप्नावस्थेतियावत् अतएवग्रहणेवाद्येंद्रियदशकस्योपलक्षणं
यत्रतत्त्वाद्यंतरालेविषयत्वंसर्वप्रमातृसाधारणत्वंनिश्चयात्ररूपत्वाबाधरहितयापरमार्थत्वेनचकासि
ततएवस्थैर्यंविषयस्यसामर्स्यःशिःपशोर्जागरःतद्विषयंप्रमातृत्वंजागरावस्थेतियावत् यावच्चात्ररूपत्विस्थै
र्यंनिश्चयस्यचकालितावज्जागरः तन्मध्यएवनिश्चयात्ररूपनिर्मलनात्स्वप्नस्यअवभाससमारंभाद्वस्तुतो
स्वप्नेपिदीर्घेयत्रस्वप्नांतरंसततदपेक्षयाजाग्रदेवजाग्रदभिमतमपिवादीर्घकालांतरेनिश्चयात्ररूपत्वं
निरोधाज्जाग्रदंतरापेक्षयास्वप्नएवेतिमंतव्यं ८ आसांतिसृणांहेयत्वप्रदर्शनेनतुर्यावस्थातः प्रभृति
उपादेयत्वंसूचयति ॥ हेयात्रयीयं प्राणादेःप्राधान्यात्कर्तृताग्रहणे तद्दानोपचयप्रायस्वात्वेङःसोदियो
गतः । यत्रायंप्रमाताप्राणापानोपादानतदिच्छाप्रयत्नादिकंपरिक्लेशंपश्यतितदेवास्यहेयतयाभातिस
वास्यस्वत्वेङःत्वेयोगवैचित्र्येणवक्ष्यतः तदवस्थात्रयेसंभवतिकर्तृताऽरूपंस्वात्मविश्रांत्याभानयोग्याल्लत
णमानंदैकघनंयस्मिन्प्रयंवपुस्तद्यदाप्राणादिलिंगसूक्ष्मपुर्यष्टकदेहादिसंमिश्रणतामभ्येतितदान
स्मिन्नुन्मीभूतेप्राणादेःप्राधान्यंस्फुरति तथाचतस्यविरूपस्ययथायथाऽहंतानिस्तथाऽङःस्वोपचयः यथा
किंचिदन्यज्ञानंतथातथास्वोपचयः तथाहिविभूतालेप्राणस्यैवोद्देकाद्दुःखंतस्यैतस्यमग्नभावादहं

तोऽहंकेवलंएवंभ्रांतस्यामंदतासत्वेनेदेहप्राणाद्याभ्यामात्माभिमंतव्ये यस्तत्समावेशस्तत्रस्तस्यतत्काले
दुःखाद्युदयएव यदाह दुर्बलोपियदाक्रमस्यतः कार्यंप्रवर्तते आच्छादयेऽभक्तांश्चतथायोगीतिबुभुक्षि
तइति एवंप्राणादेःप्राधान्येकर्तृतायांगुणभावेसुखदुःखवैचित्र्यशतयोगः प्रयासभूमिरितिज्ञापयत्स्वा।
समस्त्वन्येप्राणादिप्राधान्येकर्तृतान्यग्भावव्याप्तिरीति तत्रयंहेयमेवकर्तृताप्राधान्योन्मेषात्मतत्वैयंरूपा
त्मभूतितत्स्थैर्यात्मकतत्वंयदातीदृशांतमुपादेयमेकरसान्वेदयनस्वभावलाभउपादिसाजिहासावैवप्रपं
विश्रमप्रशमादितितात्पर्यम् १९ तत्रप्राणादिप्राधान्येहेयतायांकारणमुक्तं तत्रैवजाग्रदादित्रयाप
वर्तहिंतर्यादौतदभावात्तत्समावेशोऽस्यानानुपपद्यतेइति श्लोकद्वयेनशंकांपरिहरति ॥ प्राणापा
नमयःप्राणःप्रत्येकंसुप्तजाग्रतो उच्छेदात्मासमानाख्यःसोऽवस्थेविषुवत्त्विव । मध्योर्ध्वगाम्युदानाख्यो
तिर्यगोद्भूतभस्त्रयः विज्ञानाकलमंत्रेशोव्यानोविश्वात्मकःपरः । प्राणइतिप्राणनरूपाजीवनस्वभा
वायंचिद्रूपस्यस्थितिः मात्रावस्थामान्यपरिस्पंदरूपादेहप्राणादेरचेतनस्यचेतनायमानतासंपादना
यमानतासंपादनात्मिकाहमितिस्वातंत्र्यारोपसाराससतीविकल्परूपपरामर्शमयीसैवप्राणादिविशे
षात्मनापंचरूपतांभजते तत्रकिंचिन्नरतीक्ष्णविस्पंततीवप्रश्वासनिःश्वासरूपादिक्रमेणप्राणापानमया
नत्वंचविशेषंदर्शयति तदिदंविशेषद्वयंजाग्रतितावत्स्फुटमेवदेहान्तर्बहिःस्पृविषयेविश्रांतेःततोपिदेह
स्यनादीवाभ्यंतरेपववेद्येविश्रांतेःप्राणापानयोःसुस्पष्टत्वात् सुप्तेपितुःद्वयमस्त्येवस्वपतोपिहिप्राणा

पात्रो निर्गमप्रवेशात्मा मात्रोऽस्फुटमेवापरेणालक्षितः स्वयमेव च वेद्यसंवेदनात्मा गोपादानरूपा स्थि-
तिः संवेद्यते एवं तेन प्राणेन प्राणापानविशेषहृदयमयी जाग्रति तथा स्वप्नेऽपि स्वप्नं स्वप्नस्तदेव तत्पदाम्स
तरांशुष्टं भवति तदा सुषुप्तः प्रमातात स्पंदसौषुप्तं पदं न हि विथमपि समानरूपं विशेषं प्राणीयं सीक
रोति सवेद्येतावत्सुषुप्तेऽपि यद्यपि प्राणापानस्पंदो लक्ष्यते तथापि तयोर्मध्ये याविश्रांतिः हृदयस्पंदने
निर्विद्रियप्रदेशे न तदेवमव्यक्तः सौषुप्तमिति तत्र प्राणापानयोर्यश्छेदो विश्रांतिः कंचित्कालं त
दात्मा सकलस्यादिवर्गस्यार्वाग्यरतिर्यन्तं समानीकरणव्यापारात्मा तत्प्रवृत्तस्य विकासदा नाड्य
रूपी तत्करणकारी समानो दिनरात्रिरूपयोः प्राणापानयोः कंचित्कालं साम्याद्विच्छेदनाच्च विषुवत्काल
तस्य विषुवांश्चिन्समानीकरणमर्हतीति तदहमितिवृत्तिः उपमानवतेरेव चाव्ययत्वमहुतो निचित
इति प्रयोगात् तद्धिमाय सिद्धं न वाचनिकं विशेषवादिनरात्रितद्दिनाधिकत्वलक्षणोऽस्ववतिप्रत्ययस्य
विहितमिति शतरि विषुवत् तत्र च विषुवति विच्छिद्यमानस्य प्राणापानस्य संस्काररूपतया संभावः सैव
हि विच्छेदो न तु सर्वात्मना नाशो लीलापि क्रमसकृत् ततश्च प्रहानादानयोर्बीजरूपता सुषुप्ते रयरिति च सर्वं
मलयाकलांतः पञ्चवर्गः यदा तु स प्राणेनाहं निर्वामदत्ति गामार्गौ विलोमावयं तीमध्यरूपेणोर्ध्वेन प्रवह
ति तदा तत्प्रवहणं सकलस्य भेदस्याभेदसारतादानलक्षणं विलापनमाश्यानस्येव सर्पिषो विदधती उदा
नवृत्तिर्विज्ञानकलादारभ्य सदाशिवांते साच तुर्यात्मिका दशा मायोर्ध्वे हि विज्ञानाकलाश्रितिततः प्रभृतिमे

ई॰ प्र॰ ८८
४४

दगलनं प्रवर्त्तते विलीनेत्तभेदे सर्ववेद्यराशिरूपतत्त्वमन्तर्भावनवर्गात्मकदेहव्यापनरूपेणाध्मानरूपनिर्वा
नरूपणानिश्वासात्मकपरशिवोचितानवयानीतरूपाप्राणापवप्रमानातप्राणापानरूपः समानरूपउदानरूपोव्यान
रूपश्चेतिसामाधिकरण्यात् विज्ञानाकलस्याप्यसौमेवरूपोसौवर्गापेक्षयाईशस्यसदाशिवेश्वररूपोयोमावि
स्रदानः एतदुक्तंभवति यद्यपितत्र्यन्तदतीनयोरप्युक्तिप्राणादिनामथाजीवनस्यस्वभुक्त्यानस्यचात्ररूपप
नेस्तथापिभेदोपसंहारेणाभेदविश्रान्तिमाधावमादनयोर्दशयोः स्वतेडःखादिवैचित्र्यायोगादेक
घनस्वात्मविश्रान्तात्मकपरमानन्दमयत्वेनोपादेयतैवस्वरूपमादौनमेस्फारस्पनास्फुटवेद्योल्लास
स्फुटवेद्यावभासरूपस्यभेदस्यभेदस्यविद्यमानत्वादत्तिसुखदुःखादिवैचित्र्यमितिहेयतैवेतितुक
मक्रेहेयात्रयीयमित्यादि भगवतश्चविश्वशरीरस्यप्राणापानसमानोदानव्यानरूपतैवसकलगतोल्लास
प्रवेशप्रलयाकलविज्ञानाकलादिवर्गसदाशिवरूपतेप्यनेनदर्शितं यथोक्तं षट्त्रिंशदात्मकं विश्वे
भोःप्राणादिशाक्यइतिइति २ प्राप्ति: १२ इतिश्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञा
सूत्रविमर्शिन्यामागमाधिकारेप्रमातृतत्त्वनिरूपणे द्वितीयमाह्निकं २ अनेनतमानमेयादिवैचित्र्याभेदा
शालिने आत्मानेयः प्रपद्यते भक्तानांतेस्तुमः शिवं एवंस्वसंवेदनोपपत्यागमसिद्धमहेश्वररूपा
त्मस्वरूपंप्रदर्श्यिकारत्रयेणविततमनिर्णीतंतदेवसंक्षेपेणशिष्यबुद्धिनिवेशयितुमागमार्थसंग्र
हश्लोकाष्टादशकेनप्रदर्शयति स्वात्मैवसर्वजन्तूनामित्यानोपलेनोपपादितत्संततेनैकेनाह्निकेन तत्रश्लोके

नपारमार्थिकंरूपमनेनाश्लोकनवकेनबंधस्वरूपंप्रमातृप्रमेयतत्त्वदर्शनदिशासप्तकेनप्रत्यभिज्ञात्मकं
मोक्षतत्त्वंश्लोकेनोपसंहारंदर्शयतीतितात्पर्यम् ॥ ग्रंथार्थस्तुनिरूप्यते ॥ स्वामीवसर्वजंतूनामेकएवमहे
श्वरः विश्वरूपोहमिदमित्यखिलंसर्वंहिहितः इहजडास्तावद्वेद्येनुननिमग्नाएवभांतिरिदमितिजडपरा
मर्शोहमितिसंविन्मरामर्शएवविश्राम्यति ततश्चजडानिरात्मानइतिजंतवएवजीवाआत्मानः तेषां
चमहेश्वरएवस्वात्मा सएवमहेश्वरोननन्यःकश्चित् यतः संवित्स्वभावोसौ संविदश्चनदेशेननकालेन
नस्वरूपेणकोपिभेदः कामंदेहप्राणादयोभिद्यंतां तेतुजडपदाश्चेतननिमग्नाएवेत्येवचिदात्मास्वा
तंत्र्येणस्वात्मनियतोविश्वरूपंभासयतिततोमहेश्वरोंतर्नीतामिदंतांहंतापरामृश्यस्वात्मविश्रांतिरू
पाहंविमर्शपरिशर्णः अतएवसर्वजंतूनांकर्तृत्वेनास्ययत्नोपाययेतविचित्रबुद्धिकर्मेंद्रियविषयेंद्रिया
धिष्ठातृत्वेनकर्तृत्वेपकसैवात्मनस्तथा इंद्रियस्थानीयहृदत्तेजत्समहस्वविषयस्वभावराशेदत्तानंकरण
वतदेकत्रचिदात्मनीति । ननुयद्येकएवायंमहेश्वरस्वरूपआत्माकस्तर्हिबंधोयद्वमोचनायायमस्य
५६ मरमोद्यमइत्याह ॥ तत्रस्वस्वशरीरेदंभागेतुआसक्तोहंकारात्मनाग्रहंकारपरामर्शपदंनीतमनेनतत् । तत्रैवस्वा
त्मनिमहेश्वरेस्थितेतस्मिन्नेवप्रकाशरूपेस्वात्मदर्पणेतेनैवपरमेश्वरेणस्वातंत्र्यमायावशाद्दृष्टः संकोचरूपइदंम
इमिदंभागस्तन्मध्येयदेतद्बुद्धिप्राणदेहरूपमिदंतयावेद्यंतद्भिन्नस्यवेद्यस्यग्राहकतयास्वसूचितमिदं
भावाभिमवाद्यभविस्मृतात्मकतकेनाश्वरेणाहंभावेनपरामर्शेनभासमानंचकास्तिअहंदेवदत्तोहंचे।

ई॰ प्र॰ ८९ 89

वृत्ति २ नन्वेवमप्यस्तु तथापिकस्यबंधः ईश्वरव्यतिरिक्तोहिकोमोक्तानदेतत्परिहर्तुमाह स्वस्वरूपा
परिज्ञानमयोनेकः पुमान्मलः तत्रस्वांशेक्रियानंदौभोगोदुःखत्वमात्मकः ॥ सत्यंपरमार्थतोनकश्चि
द्बंधः केवलंस्वस्मादनेतरात्मानंआत्मायदास्वात्मानंसंकुचितमवभासयति सएवतदास्वस्वरूपा
स्ययदपरिज्ञानंभासमानत्वेप्यपरामर्शरूपंतदेवकारणेनेनप्रकृतेयस्यस्वरूपेणाख्यातिमात्रत
त्वः पुरुषश्चोच्यते अतएवानेकः तत्तद्देहप्राणबुद्धिविशेषेणसंकोचग्रहणात् सचपुमान्भोक्ता
संबंधभोगलक्षणमनुभवतिभोगश्चनामतस्ययोकल्पितोक्रियानंदौकल्पितक्रियादुःखे रजोहिप्र
काशाप्रकाशवाच्यस्वरूपंदुःखमुच्यते प्रकाशरूपंचसत्वंसत्वेनमस्त्वप्रकाशरूपोमध्येविश्रामःप्रलय
स्थानीयः ३ नन्वस्यशाविस्पन्देनकिंचिद्वक्तुंयुक्तंकिंचसंग्राह्यमित्याह ॥ स्वांगरूपेषुभावेषुपत्युर्ज्ञानंक्रि
याचया मायातृतीयेतेएवपशोःसत्वंरजस्तमः ॥ विश्वरूपस्यभगवतःस्वरूपभूतेएवविश्वमयःप्र
काशोयश्चविमर्शः तेतावज्ज्ञानक्रियेस्वरूपपरामर्शापरित्यागेनैवतयद्भिन्नतयापिविमर्शनेस्वरूपप
रामर्शएवविश्रांतमहमिदमितिसदाशिवेश्वरपरमार्थेमाभगवतोमायाशक्तिः ताएतास्तिस्रःशक्तयो
भगवतित्रैसर्गिक्यादृष्टाः स्वरूपापरिज्ञानेतभिन्नेषुभावेषुज्ञानक्रियाशुद्धमेवभिन्नत्वेप्रकाशविमर्श
रूपमितिपशोःप्रकाशःप्रकाशाप्रकाशश्चेतिक्रमेणसत्वदुःखमोहलक्षणानिप्रकाशक्रियानियम
नशीलानिसत्वरजस्तमांसि ४ ननुचैवंसतियथापरमेश्वरस्यज्ञानक्रियामायाव्यतिरिक्ताःशक्तय। ८९

इत्युच्यंते तेन तत्पशोः सत्वरजस्तमांसि प्रसज्यंते हातिरिक्तानि वर्त्तानि गुणस्तत्वान्न एव तेन तदेतत्कथमिति
संशयं शमयति ॥ भेदस्थिते शक्तिमतः शक्तित्वं नापदिश्यते एवं तु गुणानां कारणकार्यत्वपरिणा
मिनाम् ॥ सत्यमेवं स्याद्यदि भेदग्रहो न भवेत् भेदव्यवहारस्त्वयं विचार्यते तेन तत्र च संज्ञवित तचिन्मात्र
स्वभावः पुरुषो नास्य नैसर्गिकं भाव विश्वप्रकाशनादिरूपं सर्वदा तत्त्वसंगात् अपितु संबंध कृते
तत स्वतंत्र्यात्पशोः शक्तिमत्त्वेन शक्तापन्नाच्छेदेन यत्र पतानि सत्त्वादीनि तत्र स्वजयो व्यतिरेकत्वस्वीकार
ति च्यते किं स्वपकरणवाद्गुणोः स्वयंच्यते ननु पुरुषा किमिति भेदेनोच्यते उच्यते इह सत्त्वबोधः स्वमो
हपरिणामरूपमेतत्करणत्रयोदशकं कार्यदशकं च सत्वादिस्वभावत्वेनानुभूयत इति सत्वबोधः स्व
मोहाः करणकार्यवर्गतादात्म्यत्वमयो यदि पुरुषस्यापि तादात्म्यं भजेरंस्तर्हि पुरुष एव कार्यकारण
पर्यंतसृष्टिमयः संपन्नः परिणामस्य स्वरूपतत्त्व इति स्यात् अशमनात् पुरुषो विश्वस्वरूपस्यायात् तथा च न क
श्चित्स्वरूपैश्वर्य एव तस्मादस्मदभिमतानमयपुरुषस्वरूपविचारे सत्वादयो भिन्ना एवेति स्थितम् ५ ननु तत्ता
नादीनि कथं सत्वादिरूपाणि पश्यंतीत्याह सत्वानंदः क्रियापत्स्वत्वत्साभावोऽपि सापशोः इयान्मात्त द्बो
घोडः स्वसंवित्सत्वं तमोमयम् इह तावत्पति विश्वस्यावभासनं वै चित्र लक्षणेन सृष्ट्यादिना पाल
यिता स्वप्रकाशस्वभाव त्वस्य विश्वपतेर्यास्तत्वाभावनकर्तृता स्फुरत्ता रूपा स्वैव्याख्याता सा स्फुरत्ता
महासत्तेत्यत्र सैव प्रकाशस्य विमर्शाव्यतिरेकाद्विमर्शात्मक चमत्कार रूपा सती क्रियाशक्तिरुच्यते

ई॰ प्र॰ वि॰
90

रोन्मुखप्रयोगेन स्वात्मविश्रांतिरूपत्वाच्च सैवानंदः तदेवं भगवतश्चिदात्मनस्तथैवेयद्रूपता पशोस्तु स्वा
चन्तदभावस्यानंदस्य तदभावस्य संकुचितचिद्रूपत्वात् तेन योऽसौ स्वमानंदभागस्तत्प्रकाशस्वाच्छ्यनित्य
त्वं यस्तदभावस्तदावरणमोहरूपं तमः एते च ते सत्वतमसी नीलानीलवत्परस्परहारेणापि
वर्तेते कार्यत्वकारणत्ववत्यथाप्येकपरामर्शगोचरे कार्यधर्म्ये यथा चित्रपतंगसंगतनीलानीला
त्मकरूपत्वायेनान्योन्यमिश्रतयापि भातः अतो योऽयं द्वयात्मा मिश्रस्वभावस्तद्रजोगुणः अतएव
च प्रकाशस्वरूपयोः सत्वतमोरजः संघेणावस्थानमिति द्वः एवं प्रियापुत्रादेरेकघनत्वेनैव हि प्रकाशः
सत्वैकघनत्वेनैवाप्रकाशो मोहः यस्तु कथंचित्प्रकाशो यथा सत्याविकदेहरूपतया नाभिमतया कथं
चित्प्रकाशो यथा गतगदकल्याणधर्मयोगितयाभिमतया तद्वजः एवं तत्र प्रयमेव च शब्दो परी
भावस्यारक्रियापरमार्थः अत्रानुभवरूपेण नास्ति प्रतीतोकस्यां चित्कल्पितकल्पितरूपायां धियि भा
ति नीलाभावस्तत्त्वतोऽपि कल्पनाकल्पितोऽभासमानत्वाभावव्यवहारपरमार्थः तदुभयव्यामिश्रणा
त्नीलानीले भात्येनाम यत्तूभयरूपं नीलप्रतीत्यानावदकल्पितया धिया विषयीकृतं नीलमेव
स्यादिति न पशोः स्वतंत्रार्थास्तित्त्रगुणः अपि स्वार्थे पशोः स्वामत्तामत्वं तदभावस्तस्मोद्वयात्मा रजश्चेति सं
क्षेपः ९ एवं तावत्पतिपशुरूपप्रमातृतत्वं संक्षेपेण निर्णीतम् अथ प्रमेयतत्त्वं निर्णेतुं प्रथमेतावदिदं
मिदं प्रमेयतत्त्वमिति निर्णेतुमाह ॥ येयं सामयिके दंतापरामर्शभूः स्वप्रभोः तेऽपि मिश्राविभिन्नाश्च। ९॰

तथा भिन्नावभासिनः इदंभावापन्नास्तावदर्था इत्युक्तं ते च परामर्शकेन कदाचिद् भिन्ना एव परामृश्यन्ते
यदा सामान्यरूपता तथा तेऽभयात्मा असामयिकेनाकलितेनेदंभावेन सहजभेदपरामर्शरूपेण गृह्य
निर्देशादिप्रख्येन गोचरीकार्याः प्रभोरपि न केवलं सद्योजातबालादेर्यावदीश्वरस्यापि तथा तेन सा
मान्यविशेषप्रकारेण भिन्नतयावभासन्ते विविच्य तं हि तयोर्यन्मिश्रणमसिश्रतं च युगपदेकाहन्ताह
न्ताविश्रान्तं भातीति ईश्वरदशायां भावोल्लासनान्तरीयकत्वेन संवित्संकोचरूपं निषेध्यानुपरक्तेन त्वर्थ
मात्ररूपेण वा संवित्प्रकाशेनैव प्रकाशमानमहन्तानिषेधरूपामसामयिकीमिदन्तामुल्लासयति १
एवं तावदीश्वररूपस्य पत्युरिति प्रमेयतत्त्वे परमशिवे तत्र भगवति प्रमेयकथैव कथमनिष्टेति प्रमेयकथो
पयोगित्वमेव भगवतः सदाशिवेश्वरत्वमतोऽधुना पशुं प्रति कीदृक् प्रमेयस्वरूपं तावदिति सन्देहमपोह
ति श्लोकत्रयेण ॥ तेन भिन्नावभासार्थः प्रकल्प्याः प्रमातृगात्मनः तत्र हि भिन्नसंज्ञाभिः स्मरन्त्येवातिगो
चरे तत्सासाधारणीसृष्टिरीशसृष्ट्युपजीविनी सैवाध्वान्तनयासमस्तेवेशशक्त्यात्मनः स्वविश्रान्तिमप
रोधाय चलया प्राणरूपया विकल्पक्रियया तत्तद्वर्णवैचित्र्यविचित्रया ॥ तद्विशेषं द्योतयति प्रमातृगात्मन
स्त्विदं प्रमेयरूपा अर्था न त्वीश्वरवदहन्तयेनेति भिन्ना इति विभागमिश्रतया भिद्यमानश्चाभासो येषामर्थानां
ते विशेषसामान्यात्मानोऽर्थाः प्रमातृगात्मानः प्रतिपुरुषमव्याप्तिश्रुत्संवेदनावगमरूपस्यासंकोचितान्तर्गत प्र
काशात्मनः प्रकल्प्या विकल्पनीयाः प्रतिप्राणि स्ववासनानुसारेण विमिश्राभिः संज्ञाभिः घटोऽयं मन्त्रोऽयमि

ई॰ प्र॰ ६९

91

स्यादिकाभिर्भावनाविशेषोत्तसारेणानन्तमहिचित्रस्वभेदःकोऽप्युपयुक्ताभिः स्वरूपोऽन्यैस्तासां संकल्पनैस्य यात्यव
विकल्पयोगेपतडक्तंभवति ईश्वरस्य विकल्पात्मकता मंत्रेणाऽशुद्धविमर्शविषयोभावाः अर्थाःपशोस्तस्मा
मापोहनहेवा किं निर्विकल्पे समारूढास्तेऽर्था भवंति सांसारिकहृत्नादानादिव्यवहारोपयोगादि
ति नन्वविकल्प्यते यावान्नैवार्थस्तावानेव विकल्प्यते तत्को विशेषः प्रमेयस्य पतिपशुरूपता
यो उच्यते तस्येति पशुकर्तृकासृष्टिस्तेषामर्थानामीश्वरसृष्टानामपरिवर्तिनी अतएव नामीश्व
रसृष्टिमुपजीवंती असाधारणी प्रतिप्रमातृनियता तद्यथा इदं दृश्यमिति येन सृष्टं तत्तस्यैव तद्दृ
नास्य न तु यदि पशोरपि सृष्टिशक्तिरस्ति तर्हीश्वर एव सन्नमीश्वर एवासौ नन्वेवं साधारणं कस्मात्सृष्टे
र्न भवति भवेद्यदि स्वशक्तिं परिजानीयात् यावता सा तस्यापरिज्ञाता परवशस्यैव सतो विकल्प
क्रिया विकल्पनशक्तिरुदेति न त्वेकेन सा तस्योत्थाप्यते आह ईश्वरस्य परामर्शरूपतया शब्द
राशिलक्षणस्य स्वरूपविश्रान्तिलक्षणा पारमेश्वर्यापरोपप्रयोजना ब्राह्म्यादिदेवताचक्रमयीनैकैः
कारादिवर्णवैचित्र्यैर्विचित्रतया यासौ विकल्पक्रिया तस्य पशोरेकत्वनिरूढाभावाच्च चलात्तेन मिश्र
मयं शत्रुरयं मित्रमित्यादिवर्णवैचित्र्यविहतया विकल्पनक्रियया तदात्मन ईश्वरस्वभावस्यैव पशोरसाधा
रणी सृष्टिः पंचदंदतच्छत्रवञ्चोऽहस्तीनभस्मि यावतीत्वपि विमिश्रता यो विकल्पसृष्टिस्ता नाभासानी
श्वरसृष्टानेवोपजीवतीति सर्वापाशवी प्रत्ययसृष्टिरीश्वरसृष्ट्युपजीविनीत्युक्तम् ८ नन्वे

६१

वं यदि पाशवी सृष्टिः संहारश्च पातनं हि पारमेश्वरी सृष्टिः पशोः किं कुर्यादिति निर्णीयते ॥ साधारणो
मध्याचैशः सर्गः स्पष्टावभासनात् विकल्पहानेनैकाग्र्यात् क्रमेणेश्वरतापदं ऐश्वरः सर्गो द्विधा सा
धारणोऽथच दादि साधारणोऽसाम्ये एवेति निर्दिष्टो द्विचंद्रादिः तस्य च सामान्यलक्षणे स्पष्टावभासनं ना
म सोऽयं सर्गो यदा विकल्पहानक्रमेणान्तस्मिन्निर्विकल्पकदृष्टौ तथैव स्पष्टाभेऽर्थे एकाग्रतमवलंब्या
हमिदमित्यैश्वर्यपरामर्शपदं भवति तदा तल्लक्ष्यबहिर्दृष्टिर्निमेषोन्मेषपरिहारोपदेशादिशा क्रमे
णाभ्यासतारतम्येन पशोः पशुत्वं प्रतिहंति ईश्वरत्वं च दर्शयति किं च योऽयं विकल्पसर्गः पाशवत्वकः
सोऽपि यद्यसम्यगेवेति शर्वोक्तरूपवैपरीत्येन परिज्ञातयेशशाश्मापरिज्ञाततादात्म्यस्य भवति तदासो
ऽपि साधारण एवाध्ययनादिचरणांशोत्यादिविकल्परूपमप्यलमेवास्य भावितांतःकरणस्य ॥ ए
वं विकल्पनिर्ह्रासेन निर्विकल्परूपसाक्षात्कारीभावे विश्वात्मसात्ताकारलक्षणः स्वप्रमय एव मोक्षो द
र्शितः अधुना विकल्पनिर्ह्रासभावेऽपि तं दर्शयति । सोऽहं ममायं विभवश्चैवं परिज्ञानतः वि
श्वात्मनो विकल्पानां प्रसरेऽपि महेशता ॥ नहि प्रसरणात्मानाम पश्चः कश्चिद्योयोऽहमपि तत्परिदृ
ष्टीतत्याहकप्रकाशैकघनः परमेश्वरोऽयं स एवाहं सर्वात्मैवनन्नमः कश्चित् अतो विकल्पसृष्टिरपि
समस्तात्मलक्षणो विभवश्चैवं विमर्शे दृढीभूते सम्यक्परिक्षीण विकल्पापि जीवन्नेव मुक्तः यथो
क्तं शंकापि न विशंकेन निःशंकत्वमिदं स्फुटं इति ॥ १२ नन्वेवं बद्धमुक्तयोः प्रमेयं प्रति को भेद

ई॰
प्र॰
९२

92

उच्यते । मेयं साधारणो मुक्तः स्वात्माभेदेन मन्यते महेश्वरो यथा बद्धः पुनरत्यंतभेदवत् ॥ श्रीमत्सदाशि
वेश्वरपदारभ्यक्षितिपर्यंतप्रमातृवर्गाधिष्ठातृ यदहमितिरूपं तद्वात्मतयाभिनिविशते मुक्तः तत
श्च विश्वस्य प्रमेयं सममपि ममप्रमेयं विश्वस्यापि प्रमेयं चेदं ममैवाङ्गभूतं प्रमेयांतरमपि न च्येत्यवे
न क्रमेण प्रमेयं परस्परं न च प्रमातृवर्गाद्व्याहृतम् इति प्रकरस्याभेदविश्रान्तिः तन्नमस्य सर्वप
रामर्शपदमपैति बद्धस्य तु सर्वमेतद्विपरीतमित्येकत्र भेदविश्रान्त एवासौ १२ ननु सदाशि
वेश्वरभुविजीवन्मुक्तिपदे बद्धरूपपशुप्रमातृविषये च प्रमेयदशा तावत् परीक्षिता परमशिवे तु।
कथमस्या विलाशंक्याह ॥ सर्वथान्तरालीनानन्ततत्त्वौघनिर्भरः शिवश्चिदानंदघनः परमाक्षर
विग्रहः नखलु भगवति श्रीपरमशिवे प्रमेयकथा काचिदस्ति न तावत् यस्य सर्वथा तत्र चिद्रूपतामा
त्रविश्रान्तत्वेन लीनत्वात् तत स्वसावस्थासंवित्त्वभावेन स्वात्मविश्रान्त्यानंदेनात्तद्विमर्शेन सर्गिकपरा
मर्शात्मकस्वात्मस्वात्मचमत्कारलक्षणेनैकघनाप्रविच्छिन्नतद्रूपापरमाक्षरेण विग्रहवती भगवती
विश्वमयस्यानवच्छिन्नात्मस्थास्नेगलितप्रमेयकथा सर्वोत्तीर्णा व्यपदिश्यते १७ एवमपि कारवतस्यो
मेयदशा तत्फलमाह ॥ एवमात्मानमेतस्य सम्यग्ज्ञानक्रिये तथा जानन्यथेप्सितान्पश्यञ्जानाति च करोति
च एवमितीश्वररूपमात्मानं तस्य च स्वाव्यतिरिक्ते स्वातंत्र्यमात्ररूपे ज्ञानक्रिये जानन्नेवंभूतोयमात्मा नन्तका
लादिदर्शितः स्वयं च ज्ञानक्रिये न तत्तस्याव्यतिरिक्ते चेति परामृशन्यदिच्छति तज्जानाति च करोति च

९२

समावेशणाव्याप्तपरोनेनैव शरीरेण अतः परस्तस्य सति देहे जीवन्मुक्तस्तन्मात्रे परमेश्वर एवेति १७ अ
स्यार्थस्य स्वप्रत्ययसिद्धस्यापि गुरुपरस्परोपदेशयोद्वलकेमंतव्यः शास्त्रदृष्टिर्हि दर्शितागमाधिका
रेण एवं गुरुतः शास्त्रतः स्वतएतः दृढीकृतं भवतीत्यभिप्रायेण गुरुपारम्पर्यं दर्शयति इति प्रक
टितो मया सुघट एष मार्गो नवो महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा तदत्र निदधत्पदं भुवनक
र्तृतामात्मनो विभाव्य शिवतामयीमनिशमाविशन्सिद्ध्यति अस्मत्परमेष्ठिभट्टारकश्रीसोमानंदपा
दैः शिवदृष्टिशास्त्रे अयमभिनवः सर्वरहस्यशास्त्रांतर्गतः सतिशुद्धत्वादप्रसिद्धो वाद्यांतरश्च यः प्राणा
यामादिक्लेशप्रयासकलाविरहात्सुघटश्च स्वावष्टम्भः स एवात्र प्रकटितो परवादकलंकाशंकाप
सारणेन नीतः यत एवं शास्त्रगुरुस्वप्रत्ययसिद्धोयमर्थस्तादिति तस्मात्तत्र प्रमेये पदं परामर्श।
विश्राममयन्विश्वकर्तृत्वलक्षणमैश्वर्यमात्मनो विभाव्य दार्ढ्येन यदा परामृशति तर्हि न परामर्श
मात्रादेव तावज्जीवन्मुक्तो भगवान् शिव एव यथोक्तं परमेष्ठिपादैः ज्ञाते शिवत्वे सर्वस्थे प्रतिप।
त्त्यादृढात्मना करणेन नास्ति कृत्यं क्वापि भावनयापि वा सकृज्ज्ञाते सुवर्णे किं भावनाकरणादिना
सर्वथापि तन्मात्रादि तत्वदार्ढ्येन समस्तेनादि तां विभाव्य यद्यनिशमाविशति शरीरप्राणबुद्धिशू
न्येभ्योप्यनंतमं दृढयं सर्वं वा तत्रैव निमज्जयन्ननवरतं तन्मयतां विमृशति परंभूतिपर्यंतां लभते १८ न
नु यथात्मा शिव एव तदेव तर्हि न स्यात्प्रत्यभिज्ञानाप्रत्यभिज्ञानयोरविशेषः न हि बीजमप्रतिज्ञातं।

ई॰
प्र॰
५३

93

सति सहकारिसाकल्ये नांकुरं जनयतीति तत्कथमात्मप्रत्यभिज्ञाने निर्बन्धः उच्यते द्विविधार्थक्रिया।
बाह्या बीजांकुरादिका प्रमातृविश्रान्तिचमत्कारसारा च प्रीत्यादिरूपा। तत्राद्या स्वरूपप्रत्यभिज्ञानं नापे
क्षते द्वितीया तु तदपेक्षत एवं ॰ रहश्चेयमहं महेश्वर एवंभूतचमत्कारसारा परसिद्धिलक्षणा जी
वन्मुक्तिविभूतियोगमयी क्रियेतीश्वरप्रत्यभिज्ञानमत्रावश्यापेक्षणीयं ननु प्रमातृविश्रान्तिसारार्थ
क्रियाप्रत्यभिज्ञानेन विना न दृष्टा सतीति तत्र दृष्टेति क्वैतदुपलब्धमित्याशंक्याह तैस्तैरप्युपयाचितैरुप
नतस्तन्व्याः स्थितोप्यन्तिके कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा लोकस्यैष तथा न वेदित
गुणैः स्वात्मापि विश्वेश्वरो नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ॥ यथा नायकगुणसंस्र
श्रवणप्रवृद्धानुरागा कामिनी तद्दर्शनमेव परममुपादेयमाकलयन्ती दिवानिशमवशा दूत्या दैवतो
पयाचितानि हृतौ सन्देशेषणदीनि मदनलेखकहारकात्मावस्थानिवेदनानि कुर्वाणा इति सा मीभव
द्वाग्लतिकान्तिस्थितिन दातदुपयाचितवशादशंकितमेवमविथवर्तिनि प्रियतमेवलोकिते तेस्त
रुत्कर्षविशेषैः परामर्शपदवीमधिगच्छद्भिर्जनसाधारणतासादितसंपन्नमपि तत्प्रियतमावलोक
नेन हृदयंगमीकरोतीति तथा स्वात्मनी विश्वेश्वरे सततं निर्भासमानेपि तन्निर्भासनेन हृदयंगमता
माधत्ते यतः सोपि स्वात्मा विश्वजननकर्तृत्वाद्यप्रतिहतस्वशक्तिलक्षणपारमेश्वर्योत्कर्षयोगेन न परा
मृष्ट इति भासमानघटादितत्सहृतो तो जातः यदा तद्गुरुवचनाद्यात्तलक्षणाभिज्ञानाद्युपायैस्त

५३

द्वात्तानुत्कर्षान् हृदयङ्गमीकरणेनासृशाति तदा तत्वमहत्वफलमायात्येव तावत्कामविश्रा
न्तामभ्येति परिभोगाभ्यासरसेन विश्रान्तं तत्त्वमुपलभ्यते तद्वदात्मनि गुरुवचनाज्ज्ञानक्रिया
लक्षणशक्तिभित्तावादेर्वा यदा पारमेश्वर्योत्कर्षहृदयंगमीभावो जायते तदा तत्कर्षणमेव विश्रा
न्तात्मिका जीवन्मुक्तिः समावेशाभ्यासरसेन विभूतिलाभ इति तत्स्वप्रत्यभिज्ञैव परापरसिद्धिप्रदायि
नी भवति ॥ सर्वोपकारकं महाफलमिदं शास्त्रं प्रसिद्धावुपयोगेन नामधेयप्रसिद्ध्या च तदुत्कर्षस्म
रणद्वारेण जनितसद्भावनाप्रत्ययलक्षणप्रवर्तकसंवेदनया जनं प्रवर्तयितुं पितृनाम्ना स्वनाम्ना चो
पसंहारं दर्शयति जनस्यायत्नसिद्ध्यर्थमुदयाकरसूनुना ईश्वरप्रत्यभिज्ञेयमुत्पलेनोपपादिता
यस्य कस्यचिज्जन्तोरिति नात्र जात्याद्यपेक्षा काचिदिति सर्वोपकारित्वमुक्तं अयत्नेन सिद्धिः परापररूपा
यथा स्यादिति महाफलत्वं उदयाकरस्य पुत्रः श्रीमानुत्पलदेवो ऽस्मत्परमगुरुरिदं शास्त्रमकार्षीदिति
तत्प्रसिद्ध्या जनः प्रवर्तते इति प्रवर्तनाद्वारेणासावनुगृहीतो भवतीत्युभयनामनिर्देशः इयमिति हृद
यंगमतामुपपादिता शनैरानीतेति शिवम् ॥ १८ ॥ आदितः १९० ॥ इति श्रीमहामाहेश्वराचार्याभिनवगु
प्तविरचितायामीश्वरप्रत्यभिज्ञाविमर्शिन्यां तत्त्वार्थसंग्रहाधिकारे प्रथममाह्निकम् ॥ समाप्त
श्चायं तत्त्वार्थसंग्रहाधिकारः ॥ एषाभिनवगुप्तेन सूत्रार्थप्रविमर्शिनी ॥ वृत्तिता प्र
त्यभिज्ञायां लेख्याहमिरमंगरा ॥ वाक्प्रमाणपदतत्त्वसदागमाद्यैः स्वात्मोपयोगमुपयातमतः

दे. प्र. ५०

९५

स्वशास्त्रात् भोमान्संजलमयोम्रनममय९शेमुक्कार्कमेकामिहयोजयितंत्तमोमः आत्मानमन
भिज्ञायविवेक्ंयोमदिच्छति तेनभोतेनकिंवाकंप्रमेभिक्तोभवानिति येनेयं हर्वैलिवि
तानन्हातोयेश्लोकः श्रीमत्सोमानंदवंशपोतिवेः द्वाग्लक्ष्मीमेतोश्वत्वभित्ताविह तिम् भोगा
नेदेवालभावेदद्दंतः संवासिम्यादेववैश्यानियोगः इतीश्वरप्रत्यभिज्ञासमाप्तेतिशिवम् ॥